# केन्द्रीय विद्यालय का.हि.वि.वि. परिसर , वाराणसी

## सत्रीय परीक्षा द्वितीय - 2024-25

**विषयः – संस्कृतम्** **कक्षा - नवमी**

**समयः- सार्धद्विहोराम्** **पूर्णाङ्काः - 60 अङ्काः**

**प्रश्न-1 अधोलिखितं गद्यांश पठित्वा प्रश्नानाम् उत्तराणि निर्देशानुसारम् लिखत- 5**

अस्मिन् संसारे किंचिदपि वस्तु मातुरधिकं प्रियं पूज्यं वा न वर्तते। सर्वे एवं जनाः दुःखेषु मातरमेव स्मरन्ति। सा स्वसन्ततिपालने अनेकानि कष्टानि सहते। सा स्वसन्ततेः हेतोः सर्व सुखं भोजनमपि विस्मरति। स्वनिद्रामपि त्यजति सा। अतएव मातुः स्थानं सर्वोपरि वर्तते। संसारे कुपुत्रस्तु भवितुं शक्नोति किन्तु माता कुमाता भवितुं शक्नोति। मातृमनसि स्वसन्ततिं प्रति यादृशं नैसर्गिकमसाधारणं वात्सल्यं भवति न तादृशमन्यत्र कुत्रापि दृश्यते। जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। ।

**एकपदेन उत्तरत- 4*½=2**

(1) संसारे सर्वाधिकं प्रियं पूज्य वा का ?

(ii) माता का भवितुं न शक्नोति ?

(iii) मातुः स्थानं कीदृशं वर्तते ?

(iv) कुत्र स्वसन्ततिं प्रति असाधारणं वात्सल्यं भवति ?

**II. पूर्णवाक्येन उत्तरत- 1*1=1**

(1) मात कस्मिन् कार्य अनेकानि कष्टानि सहते सा कस्माद् अपि गरीयसी ?

**III. निर्देशानुसारं शुद्धम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत- 4*½=2**

(1) "स्मरन्ति" इति क्रियायाः कर्तृपदम् किम् ?

(अ) मातरम् (आ) जनाः (इ) वस्तु (ई) दुःखेषु

(ii) "सुपुत्रः" इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम् ?

(अ) कुमाताः (आ) कुसन्ततिः (इ) कुपुत्रः (ई) सुपुत्रः

(iii) "स्नेहम्" इति पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम् ?

(अ) वात्सल्यं (आ) पालनं (इ) नैसर्गिक (ई) यादृशं

(iv) "सा" इति सर्वनामपदं कस्यै प्रयुक्तम् ?

(अ) सन्ततये (आ) मात्रे (इ) स्वनिद्रायै (ई) कुमात्रे

## 'ख' भाग रचनात्मक – कार्यम्(10 अङ्काः)

**2. मञ्जूषायां प्रवत्तशब्दानाम् सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत-  1*5=5**



| मञ्जूषा |
| --- |
| **अध्यायकः, छात्राः, विद्यालये, अवधानेन, मोदन्ते, संस्कृतं, पठन्ति, शान्तमनसा, शृण्वन्ति, अनुभवन्ति, विद्वान, अस्ति, प्रश्नान्, पठनकाले, कृष्णापटम्, उपविष्टाः, बालकाः, बालिकाः, स्थितः, पाठयति, कक्षायाम्, आसनेषु।** |

## अथवा

**3.मञ्जूषायां प्रदत्तशब्दानाम् सहायतया 'पुस्तकालयः' इति विषयं अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत I**

| |
| --- |
| **मञ्जूषा - पुस्तकालयः, संस्कृतग्रन्थाः, ग्रन्थालयः, विस्मयेन, मौनम्, उपविशन्ति, विद्यालयस्य, I अभ्यासेन, विद्या, विनयम्, अस्माकं, प्रथमवारं, धारयितव्यम्, पठन्ति, गौरवम्।** |

## 4. मञ्जूषातः उचितं पदम् आदाय अधोदत्तं वार्तालापं पूरयत-10*½=5

अभिषेक : शुभ्रे, नव प्रियं पुस्तकं किमस्ति ?

शुभा - मम प्रियं पुस्तकं **(i)**............... अस्ति।

अभिषेकः -..............**(ii)** कः रचयिता ?

शुभ्रा - **(iii)**.............. रामायणस्य रचयिता।

अभिषेकः - रामायणस्य कः **(iv)**............. ?

शुभ्रा - **(V)**.............. रामायणस्यनायकः I

अभिषेकः - रामः कस्य **(vi)** ...........आसीत्?

शुभ्रा - रामः **(vii)** ...........ज्येष्ठः पुत्रः आसीत् I

अभिषेकः - रामस्य **(viii)**.............कीदृशम् आसीत् ?

शुभ्रा - रामस्य चरित्रम् उदात्तम् **(ix)..........**चास्ति।

अभिषेकः **- (x)...............** एतादृशाय महापुरुषाय।

| **मञ्जूषा** |
|---|
| रामायणस्य**,** रामायणम्**,** नायकः**,** नमः**,** रामः**,** अनुकरणीयम्**,** वाल्मीकिः**,** दशरथस्य**,** चरित्रम्**,** पत्रः |

## **'ग' भागः अनुप्रयुक्त – व्याकरणम् (20अङ्काः)**

**5. प्रदत्तविकल्पेभ्यः उचितं उत्तरं चित्वा सन्धिं सन्धिच्छेदं वा कुरुत- 1*4=4**

(i) <u>शरच्चन्द्रस्य</u> नाम को न जानाति **?**

**(क)** शरत् **+** चन्द्रस्य **(ग)** शरद् **+** चन्द्रस्यः

**(ख)** शरच् **+** चन्द्रः **(घ)** शरत् **+** चन्द्रः

**(ii)** रामेण <u>उल्लिखितम्</u> कार्य शोभनं अस्ति।

**(क)** उत **+** लेखितम् **(ग)** उद् **+** लिखितम्

**(ख)** उत् **+** लिखितं **(घ)** उल् **+** लिखितं

**(iii)** सः पठने <u>तल्लीनः</u> वर्तते।

**(क)** तल **+** लीनः **(ख)** तल् **+** लीन

**(ग)** तत् **+** लीनः **(घ)** तन लीनः

(iv) <u>तच्चित्रं</u> दृष्ट्वा बालाः हसन्ति।

**(क)** तत् **+** शित्रम् **(ख)** तच् **+** चित्रं

**(ग)** तत् **+** चित्रम् **(घ)** तच्चि **+** त्रम्

**6.. कोष्ठकात् उचितं विभक्तिपदं चित्वा रिक्तस्थानं पूरयत-1*4=4**

**1.** अलम्..........**।** **(युद्धाय/युद्धेन)**

**2.** बालकः ............सह गच्छति। **(जनकेन/जनकस्य)**

**3.** बालकः............. विभेति **।** **(सिंहेन/सिंहात्)**

**4.** छात्रः...............प्रमाद्यति। **(पठनेन/पठनात्)**

**7. प्रदत्तविकल्पेभ्यः उचितं शब्दरूपं चित्वा रिक्तस्थानानि पूरयत-1*4=4**

**(i)..............** पुरुषः देशं रक्षति।

(अ) राजस्य (आ) राज्ञः. (इ) राज्ञा. (ई) राजनस्य

(ii) कश्चिद्.........तत्र आगच्छत् ।

(अ) विद्वानः (आ) विद्वांसौ (इ) विद्वान् (ई) विद्वांसः

(iii).........अजर अमरः च अस्ति।

(अ) आत्मा. (आ) आत्मनः (इ) आत्मनाम् (ई) आत्मना

(iv)......... सह मम भगिनी अपि गमिष्यति।

(अ) भवतेन. (आ) भवान्. (इ) भवत्यौ. (ई) भवता

**8. प्रवत्त विकल्पेभ्यः उचितं धातुरूपं चित्वा रिक्तस्थानानि पूरयत-1*4=4**

(1) त्वं आयुष्मान............।

(अ) भवतु (आ) भवताम् (इ) भव (ई) सन्ति

(2) कुक्कुराः इतस्ततः गत्वा रोटिकां........।

(अ) भक्षयताम् (आ) भक्षयन्तु (इ) भक्षयेयुः (ई) भक्षयाम

(3) वयं विदेशं गन्तुं............।

(अ) इच्छतु (आ) इच्छाम् (इ) इच्छत (ई) इच्छताम्

(iv) मह्यं पर्वतभ्रमणं...........।

(अ) रोचन्ताम् (आ) रोचध्वम् (इ) रोचताम् (ई) रोचामहै

**9. वाक्येषु रेखाङ्कित पदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य च समुचितं उत्तरं लिखत-4*½=2**

(1) श्यामः पत्रालयं **गम् + तुमुन्** इच्छति।

(ii) रामः जलं **पीत्वा** विद्यालयं गच्छति।

(ii) छात्रः शिक्षक **प्रणम्य** गच्छति।

(iv) रमा **वि +हस् +ल्यप्** वार्तालापं करोति ।

**10.प्रदत्त विकल्पेभ्यः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत-4*½=2**

(i) अहम् ......दूरदर्शने (T.V.) नाटकम् पश्यामि । (यथा/अधुना/पुरा/इव)

(ii) मेघाः.......... गर्जन्ति। (वृथा/सहसा/उच्चैः/विना)

(iii)विद्यां ........मनुष्यः पशुः अस्ति। (एव/इव/अपि/विना)

(iv) यथा राजा ........प्रजा। (अत्र/इदानीम्/यथा/तथा)

## 'घ' भागः पठित – अवबोधनम् (25 अङ्काः)

**11.अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत-(5)**

अन्येद्युः स मुनिः समन्विष्य तं धर्मव्याधं विपणिस्थं मांसानि विक्रीणन्तम् उपागच्छत्। धर्मव्याधश्च दृष्ट्वा एवं तं मुनिम् अभाषत-"ब्रह्मन्। किं पतिव्रतया तया इह त्वं प्रेषितः"? तत् आकर्ण्य स मुनिर्विस्मितः तं धर्मव्याधम् अवदत् "भद्र। मांसविक्रयिणः ते कथम् ईदृशं विज्ञानम् "? धर्मव्याधः अवदत् 'ब्रह्मन्! अहं मातापित्रोर्भक्तः। तौ हि मम परायणम्। अहं तौ स्नापयित्वा स्नामि, भोजयित्वा भोजनं स्वीकरोमि। शाययित्वा च स्वपिमिः तेन मे एतादृशं विज्ञानम्। अन्यहतानां च मृगादीनां स्वधर्म मत्वा वृत्यर्थ विक्रीणे, नतु स्वीकरोमि, शाययित्वा चं स्वपिमि। तेन धनलिप्सया।

**I. एकपदेन उत्तरत-2*½=1**

**(i)** धर्मव्याधः कस्य भक्तः **?**

**(ii)** 'किं पतिव्रतया तया इह त्वं प्रेषितः**?**' इति कः अपृच्छत् **?**

**II. पूर्णवाक्येन उत्तरत-1*2=2**

**(i)** विस्मितः मुनिः धर्मव्याधम् किम् अवदत् **?**

**III. प्रदत्तविकल्पेभ्यः शुद्धम् उत्तरं चित्वा निर्देशानुसारं लिखत-2*1=2**

**(i)** 'तौ हि मम परायणम्।'- अत्र 'तौ' सर्वनामपदं काभ्यां प्रयुक्तम् **?**

(अ) मात्रे (आ) मातृपितृभ्याम् (इ) पितरः (ई) पित्रा

**(ii)** श्रुत्वा' पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम् **?**

(अ) आकर्ण्य (आ) तया (इ) मत्वा (ई) दृष्ट्वा

**12.अधोलिखितान् पद्यांशान् पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृते लिखत-(5),**

भवन्ति नम्मास्तरवः फलोद्गमैः
नवाम्बुभिर्भूरिविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्।।

**1. एकपदेन उत्तरत- 2*½=1**

(अ) तरवः कैः नम्राः भवन्ति**?**

(आ) के समृद्धिभिः अपि अनुद्धताः भवन्ति **?**

**II. पूर्णवाक्येन उत्तरत- 1*2=2**

के काभिः अनुद्धताः भवन्ति**?**

**III. निर्देशानुसारं उत्तरत- 2*1=2**

**(1)** 'वृक्षाः' इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् **?**

(अ) तरवः (आ) घनाः (इ) नम्राः (ई) अनुद्धताः

(ii) 'उद्धताः' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(अ) तरवः (आ) अनुद्धताः (इ) नम्राः (ई) घनाः

**13. अधोलिखितेषु वाक्येषु स्थूलपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत-1*5=5**

(क) **अविवेकिता** अपि अनर्थाय ।

(ख) राजा **पुत्राणाम्** आचारहीनतया उद्विग्नमनाः आसीत्।

(ग) एकः चन्द्रः **तमः** हन्ति।

(घ) **विद्यया** बालकस्य पुनर्जन्म भवति।

(ङ) **हितोपदेशः** नीतिकथानां सङ्कलनमेव ।

**14. अधोलिखित पद्यांशानाम् अन्वययोः रिक्तस्थानपूर्तिम् कुरुत-2**

कीटोऽपि सुमनः सङ्गादारोहति सतां शिरः।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः॥

**अन्वयः**

कीटः अपि 1. ........सङ्गात् 2...........शिरः 3........ महद्भि सुप्रतिष्ठितः अश्मापि 4.........याति ।

**15.अधोलिखित पंक्तिनाम् उचितं भावार्थं उत्तरपुस्तिकासु लिखत-4**

1. सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।

**भावार्थः**

(i) कार्याणि तु सदैव सुविचार्य एवं करणीयानि। ये विचारं विना एव 1...........कुर्वन्ति,थे दुखिनः भवन्ति। अंतः 2.............. विना किमपि न करणीय।

(ii) सहसा विदधीत न क्रियाम्।

**भावार्थ :** अस्मिन् जीवने 1. ............कार्य सर्वदा एव 2. ............कर्तव्यम्।

**16.कथाक्रमानुसारम् अधोलिखितानि वाक्यानि पुनः लिखत-4**

(क) राजा निजपुत्रान् विष्णुशर्मणः करे समर्पितवान्।

(ख) राजा पण्डितसभां कारितवान्।

(ग) विष्णुशर्मा महापण्डितः सकलनीतिशास्वतत्वज्ञः बृहस्पतिः इव आसीत्।

(घ) भोः भोः पण्डिताः। किं कश्चित् विद्वान् अस्ति यः मम पुत्रान् शिक्षयितुं समर्थः।

(ङ) भागीरथी तीरे पाटलिपुत्रनामधेयं नगाम् आसीत्।

(च) राज्ञः पुत्राः अनधिगतशास्त्राः नित्यमुन्मार्गगामिनः आचारहीनाश्च आसन्।

(छ) पाटलिपुत्रे सुदर्शनः नाम सर्वगुणोपतः राजा आसीत्।